अपि च तत्रैव २४० अध्याये ।
"द्वादशध्यानपर्य्यन्तं मनो ब्रह्मणि यो नरः ।
तुष्टे तु संयतो मुक्तः समाधिः सोऽभिधीयते ॥
ध्येयमेव हि सर्व्वत्र ध्याता तन्मयतां गतः ।
पश्यति द्वतरहितं समाधिः सोऽभिधीयते ॥"
अन्यच्च विष्णुपुराणे । ६ । ७ । ६० ।
"तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत् ।
मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते ॥"
अपरञ्च ।
"इमं गुणसमाहारमनात्मत्वेन पश्यतः ।
अन्तः शीतलता यस्य समाधिरिति कथ्यते ॥"
इति योगवाशिष्ठे उपशमप्रकरणम् ॥

योगाङ्गविशेषः । यथा । समाधिस्तु द्विविधः । सविकल्पको निर्व्विकल्पकश्चेति । तत्र सविकल्पको नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षया द्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानम् । तदा मृण्मयगजादिभानेऽपि मृद्भानवत् द्वैतभानेऽप्यद्वैतं वस्तु भासते । तदुक्तमभियुक्तैः ।
"दृशिस्वरूपं गगनोपमं परं
सकृद्विभातं त्वजमेकमक्षयम् ।
अलेपकं सर्व्वगतं यदद्वयं
तदेव चाहं सततं विमुक्तम् ॥
दृशिस्तु शुद्धोऽहमविक्रियात्मको
न मेऽस्ति बन्धो न च मे विमोक्षः ॥"
इत्यादि ॥ * ॥

निर्व्विकल्पकस्तु । ज्ञातृज्ञानादिभेदलयापेक्षया द्वितीयवस्तुनि तदाकाराकारितायाः बुद्धिवृत्तेरतितरामेकीभावेनावस्थानम् । तदा तु जलाकाराकारितलवणानवभासेन जलमात्रावभासवदद्वितीयवस्त्वाकाराकारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमेवावभासते । ततश्चास्य सुषुप्तेश्चाभेदशङ्का न भवति उभयत्र वृत्त्यभाने समानेऽपि तत्सद्भावासद्भावमात्रेणानयोर्भेदोपपत्तेः ॥ अस्याङ्गानि । यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः । तत्र अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहाः यमाः ।१। शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः।२ करचरणादिसंस्थानविशेषलक्षणानि पद्मस्वस्तिकादीनि आसनानि । ३ । रेचकपूरककुम्भकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः । ४ । इन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः । ५ । अद्वितीयवस्तुन्यन्तरिन्द्रियधारणं धारणा । ६ । तत्राद्वितीयवस्तुनि विच्छिद्य विच्छिद्य अन्तरिन्द्रियवृत्तिप्रवाहो ध्यानम् ।७। समाधिस्तु उक्तः सविकल्पक एव । ८ । एवमस्याङ्गिनो निर्व्विकल्पकस्य लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारो विघ्नाः सम्भवन्ति । लयस्तावत् अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेर्निद्रा । १ । अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेरन्यावलम्बनं विक्षेपः । २ । लयविक्षेपाभावेऽपि चित्तवृत्ते रागादिवासनया स्तब्धीभावात् अखण्डवस्त्वनवलम्बनं कषायः । ३ । अखण्डवस्त्वनवलम्बनेनापि चित्तवृत्तेः सविकल्पानन्दास्वादनं रसास्वादः । समाध्यारम्भसमये सविकल्पानन्दास्वादनं वा । ४ । अनेन विघ्नचतुष्टयेन रहितं चित्तं निर्व्वातदीपवदचलं सदखण्डचैतन्यमात्रमवतिष्ठते यदा तदा निर्व्विकल्पकः समाधिरित्युच्यते ॥ * ॥ तदुक्तम् ।
"लये सम्बोधयेत् चित्तं विक्षिप्तं शमयेत् पुनः ।
सकषायं विजानीयात् शमप्राप्तं न चालयेत् ॥
नास्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत् ॥"
इत्यादि । यथा दीपो निवातस्थो नेङ्गते इत्यादि च । इति श्रीसदानन्दयोगीन्द्रविरचितवेदान्तसारः ॥ (स्वनामख्यातवैश्यविशेषः । अयं हि महामायामाराध्य परं ज्ञानमलभत् । अस्य विशेषवृत्तान्तस्तु देवीमाहात्म्ये द्रष्टव्यः ॥)

समाधिस्थः, त्रि, (समाधौ तिष्ठतीति । स्था + कः ।) समाधियुक्तः । यथा,—
"मनः संकल्परहितमिन्द्रियार्थानचिन्तयन् ।
यस्य ब्रह्मणि संलीनं समाधिस्थः स कीर्त्तितः ॥
ध्यायतः परमात्मानमात्मस्थं यस्य योगिनः ।
मनस्तन्मयतां याति समाधिस्थः स कीर्त्तितः ॥"
इति गारुडे गीतासारे २४० अध्यायः ॥

समानं, त्रि, (समानीति सम्यक्प्रकारेण प्राणितीति । सम् + आ + अन + अच् । यद्वा, समानं मानमस्य । समानस्य छन्दसीति सः ।) सत् । समम् । (यथा, रघुः । २ । ७४ ।
"भुजे भुजङ्गेन्द्रसमानसारे
भूयः स भूमेर्धुरमाससञ्ज ॥")
एकम् । इति मेदिनी ॥ (यथा, मनुः ।४।४०।
"नोपगच्छेत् प्रमत्तोऽपि स्त्रियमार्त्तवदर्शने ।
समानशयने चैव न शयीत तया सह ॥" * ॥
मानेन सह वर्त्तमानमिति विग्रहे गर्व्वसहितञ्च । यथा, भागवते । १ । १६ । २६ ।
"स्त्रैर्य्यं समानमहरत् मधुमानिनीनां
रोमोत्सवो मम यदङ्घ्रिविटङ्किताया: ॥")

समानः, पुं, (समन्तादनित्यनेनेति । सम् + अन + घञ् ।) शरीरस्थवायुविशेषः । स तु नाभिसंस्थितः । इत्यमरभरतौ ॥ (यथा,—
"हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः ॥")
वर्णभेदः । इति हेमचन्द्रः ॥ स तु एकस्थानोच्चार्य्यवर्णः । यथा । साम्यस्त्वेकस्थानत्वम् । इति मुग्धबोधव्याकरणम् ॥

समानकालीनः, त्रि, (समानकाले भवः । समानकाल + खः ।) तुल्यकालोत्पत्तिकः । यथा । गोषु दुह्यमानासु आगतः दुग्धास्वागत इत्यादौ समानकालीनत्वं भासते । तेन गोविषयकवर्त्तमानदोहनकालीनगमनानुकूलकृतिमान् । एवं गोविषयकातीतदोहनसमानकालीनातीतगमनानुकूलकृतिमानिति बोधः । इति सारमञ्जरी ॥

समानोदकः, पुं, (समानं एकं तर्पणकाले देयमुदकं यस्य ।) एकोदकः । स तु ज्ञातिविशेषः । अयं हि समानं एकमुदकमस्य । यथा,
"जारो नङ्गः सगोत्रस्तु स्वजनज्ञातिबान्धवाः ।
सकुल्यबन्धुदायादस्वसमानोदका अपि ॥"
इति जटाधरः ॥
स तु चतुर्द्दशपुरुषपर्य्यन्तः जन्मनामस्मृतिपर्य्यन्तश्च । तत्र आद्यस्यैकादशपुरुषावधिचतुर्द्दशपुरुषपर्य्यन्तस्याशौचं पक्षिणी द्वितीयस्यैकाहः । यथा । उदकक्रियामधिकृत्य पारस्करः । सर्व्वे ज्ञातयो भावयन्ति । आसप्तमाद्दशमाद्वा समानग्रामवासेन यावत् सम्बन्धमनुस्मरेयुर्व्वा इति भावयन्ति निष्पादयन्ति अत्र यावत् सम्बन्धमनुस्मरेयुरेककुलजाता वयमिति स्मरणं भवतीत्यनेनैव सर्व्वेषामुदकदाने प्राप्ते यदासप्तमाद्दशमादुक्तं तत्सन्निकर्षतारतम्येनाशौचभेदेऽप्युदककर्म्म समानार्थमिति । अशौचभेदस्तु सप्तमपुरुषपर्य्यन्तं सपिण्डत्वाद्दशाहः । ततश्च दशमपुरुषपर्य्यन्तं त्र्यहः । तथा च विष्णुदक्षौ ।
"दशाहेन सपिण्डास्तु शुध्यन्ति प्रेतसूतके ।
त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यन्ति
गोत्रजाः ॥"
ततश्चतुर्द्दशपुरुषपर्य्यन्तं पक्षिणी ततश्च जन्मनामस्मृतिपर्य्यन्तमेकाहः । तथा च मिताक्षराविवादचिन्तामण्योर्बृहन्मनुः ।
"सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते ।
समानोदकभावस्तु निवर्त्तेताचतुर्द्दशात् ॥
जन्मनामस्मृतेरेके तत्परं गोत्रमुच्यते ॥"
अत्र समानोदकत्वे द्विविधे पूर्व्वत्र गोतमः पक्षिणीमसपिण्डे । परत्र हारीतः । मातामहे त्रिरात्रं स्यादेकाहस्त्वसपिण्डके इति । अत्रैव गोत्रजानामहः स्मृतमिति जाबालवचनम् ततः परं सर्व्वथा समानोदकतानिवृत्तेः स्नानमात्रमिति स्नात्वा शुध्यन्ति गोत्रजा इति दक्षवचनाद्युक्तत्वादिति । इति शुद्धितत्त्वम् ॥

समानोदर्य्यः, पुं, (समाने उदरे शयितः । "समानोदरे शयित ओ चोदात्तः ।" ४।४।१०८। इति यत् । "विभाषोदरे ।" ६ । ३ । ८८ । इति पक्षे सादेशो न ।) सहोदरः । इत्यमरः ॥ (यथा, भट्टिः । ७ । ८६ ।
"समानोदर्य्यमस्माकं जटायुश्च सुधादरात् ॥")

समापः, पुं, (समा आपो यस्मिन् । ऋक्पूरित्यः । "समाप ईत्वे प्रतिषेधो वक्तव्यः ।" ६।३।६७। इत्यस्य वार्त्तिकोक्त्या ईत्वप्रतिषेधः ।) देवयजनम् । इति मुग्धबोधव्याकरणम् ॥

समापकः, त्रि, समापनकर्त्ता । समापयति यः संपूर्व्वापधातोर्णकप्रत्ययेन निष्पन्नः । यथा,—
"आख्याताख्यवादयस्तेषाञ्च प्रधानत्वं वाक्यसमापकत्वात् ।" इति दुर्गादासः ॥

समापनं, क्ली, (सम् + आप् + ल्युट् ।) परिच्छेदः । समाप्तिः । (यथा, मनुः । ५ । ८८ ।
"आदिष्टी नोदकं कुर्य्यादाव्रतस्य समापनात् ।
समाप्ते तूदकं कृत्वा त्रिरात्रेणैव शुध्यति ॥")